शास्त्री-I    साहित्य

# अभिज्ञानशाकुन्तलम्

Date __/__/__

प्र०(1) पद्यमिदम् व्याख्येयम् ?

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः

उत्तरम् - प्रसंगः :— प्रस्तुतोऽयं श्लोकः महाकवि कालिदासस्य प्रणीत अभिज्ञानशाकुन्तलम्-नाट्यशास्त्रस्य पञ्चमाङ्कात् उद्धृतोऽस्ति। अस्मिन श्लोके शकुन्तलामुपदिश्य तां पतिगृह एव बलान्निवासयितुमुद्यतं शार्ङ्गरवं ब्रूते नृपतिर्दुष्यन्तः ।

व्याख्या :— शशाङ्कः चन्द्रः कुमुदान्येव = कैरवकुलान्येव बोधयति = विकासयति न पुनः पँकजानि सविता = सूर्यस्तु पङ्कजान्येव बोधयति, न कुमुदानि । हि = यतः, निश्चितं, वशिनां = इन्द्रियसंयमिनाम् वृत्तिः = चित्तवृत्तिः व्यापारो वा परेषां परिग्रहाणां संश्लेषे पराङ्मुखीति परपरिग्रहसंश्लेषपराङ्मुखी = अन्यकलत्रसम्पर्ककलङ्कविमुखी परकलत्रस्वीकृतिनिवर्तनशीला भवति, जितेन्द्रिया हि परकलत्रं मनसापि न स्वीकुर्वन्ति । परिग्रहः परिजने पत्न्यामिति विश्वः ।

अर्थ भावः — अयि तापस! कथमेनां कण्वकन्यां प्रतारयसि मम गेहे निवासेऽपि नाहमेनामङ्गीकरिष्यामि । पश्य, यथा चन्द्रमाः कुवलयान्येव विकासयति, न कमलानि, सूर्यश्च पङ्कजान्येव विकासयति न कुमुदानि । तथैव जितेन्द्रियाः पुरुषपुङ्गवाः परकलत्राणि मनसाऽपि न कामयन्ते । तस्मादेनामत्र निवासयितुं भवतामुद्यमो व्यर्थं एव भविष्यति । अतो नैनां परित्यज्यमहं स्वान्तःपुरे स्थापयिष्यामीति भावः । अत्र अप्रस्तुतप्रशंसादृष्टान्तार्थान्तरन्यासा अलङ्कारा आर्या छन्दश्च ।

Renu Devi
07/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-II साहित्य

रत्नावली- नाटिका

Date ___/___/___

-दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।
प्रियसखि विषमं प्रेम मरणं शरणं नवरमेकम् ॥

-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकविश्रीहर्षदेव विरचिता रत्नावली- नाटिकायाः द्वितीयोऽङ्कात् उद्धृतोऽस्ति।

व्याः- दुर्लभजनानुरागः = दुर्लभे = दुष्प्राप्ये जने = नरे अनुरागः = प्रेम, गुर्वी = महती । लज्जा = ह्री, आत्मा = स्वदेहः (आत्मा कलेवरे यत्ने स्वभावे परमात्मनि इति धरणिः) परवशः = पराधीनः । वर्तते इति शेषः । प्रियसखि = हे प्रिय आलि, (त्वम्) प्रेम = अनुराग विषयम् = विसदृशम् । एकम् = केवलम्, मरणम् = मृत्युः । न वरम् = नास्ति श्रेष्ठम् । शरणम् = उपायः, वर्तते इति । आर्यावृत्तम् ।

Renu Devi
07/08/20

राध्या उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री-II साहित्य-तृतीय-पत्रम्
किरातार्जुनीय महाकाव्यम्
Date __/__/____
प्रथमःसर्गः

1) प्र० - पद्यमिदम् व्याख्येयम् ?

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि भारविविरचितं किरातार्जुनीयमहाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।
प्रस्तुत श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति हे राजन्! मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्।

व्याख्या: — हे नरदेव = हे राजन्। ——— एतर्हि = इस समय, मनस्विगर्हिते = शूरजनों से निन्दित। वर्त्मनि = मार्ग में, विवर्तमानं = चलते हुए। भवन्तं = आपको, उदीरितः = उद्दीप्त हुआ। मन्युः = क्रोध शुष्कं = सूखे, शमीतरुं = शमीवृक्ष को, उच्छिखः = ऊपर को उठ रही हैं लपटें जिसकी (ऐसा), वह्निः इव = अग्नि की तरह, कथं न ज्वलयति = क्यों नहीं जला रहा है।

भावार्थ: — हे राजन्! सम्प्रति वीरजनविनिन्दिते पथि विचरन्तं अर्थात् शत्रुकृतमपमानं सहमानं भवतम् उद्दीपितः क्रोधः तथा कथं नोद्दीपयति यथा उद्गतज्वालो वह्निः शुष्कं शमीतरुं भस्मसात् करोति।

Renu Devi
07/08/20
राधा उमाकान्त सं० महावि० सुरखसेना, पूर्णिया।

उपशास्त्री - I    साहित्य- तृतीय-पत्रम्

किरातार्जुनीय महाकाव्यम्-प्रथमसर्गः

Date ___/___/___

(1) — पद्यमिदम् व्याख्येयम् ?

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ।।

प्रसंगः— प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितं किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतं अस्ति ।

अस्मिन् श्लोक वनेचरः युधिष्ठिरं प्रति कथयति । तस्मात्त्वद्विषये कपटं कर्तुं सन्नद्धे दुर्योधने त्वं यत्कर्तुं वाञ्छसि तच्छीघ्रमेव विधीयताम् । परोक्त वचनैः संग्राहकाणां मत्सदृशानां वनेचराणां वाक्यानि तु केवलं समाचारज्ञापकान्येव भवन्ति ।

व्याख्या— तद् = इसलिए, त्वयि = तुम्हारे प्रति, जिह्मं = कुटिलता कर्तुं = करने को, उद्यते = तत्पर हुए । अत्र = उस दुर्योधन के विषय में विधेयं = करनेवाले, उत्तरं = प्रतीकार को, आशु = शीघ्र विधीयतां = कर डालें । परप्रणीतानि = दूसरों के कहे हुए, वचांसि = वचनों को, चिन्वतां = इकट्ठा करने वाले, मादृशां = मुझ जैसे (वनेचरों) की गिरः = वचन, प्रवृत्ति साराः खलु = वार्तामात्र जिसमें तत्व है (ऐसी होती हैं) ।

Renu Devi
07/08/20
राध्या उमा कान्त सं० महावि० सुरवसेना, पूर्णिया ।